श्री मोहनलालजी
जैन ज्ञान भंडार
गोपीपुरा, सुरत.

E १२८३
प्र नं. ९९६२

पण्डित श्री पद्मविजयगणिशिष्य–ज्योतिर्विजयविरचितम्–

# तत्त्वामृतम् ।

इष्टदेवने नमस्काररूप मङ्गलचरण, तथा ग्रन्थ बनाववानुं प्रयोजन विगेरे

देवदेवं जिनं नत्वा भवोद्भवविनाशकम् । वक्ष्येऽहं देशनां काञ्चिद् मतिहीनोऽपि भक्तितः ॥ १ ॥
संसारे पर्यटन् जन्तुर्बहुयोनिसमाकुले । शारीरं मानसं दुःखं प्राप्नोति बत दारुणम् ॥ २ ॥
आर्तध्यानरतो मूढो न करोत्यात्मनो हितम् । तेनाऽसौ सुमहाक्लेशं परत्रेह च गच्छति ॥ ३ ॥

आत्माने आ लोक अने परलोकमां सुखप्राप्तिना उपायो

ज्ञानभावनया जीवो लभते हितमात्मनः । विनयाचारसम्पन्नो विषयेषु पराङ्मुखः ॥ ४ ॥
आत्मानं भावयेन्नित्यं ज्ञानेन विनयेन च । मा पुनर्म्रियमाणस्य पश्चात्तापो भविष्यति ॥ ५ ॥
तथा हि सत्तपः कार्यं ज्ञानसद्भावभावितैः । यथा विमलतां याति चेतोरत्नं सुदुर्लभम् ॥ ६ ॥
नृजन्मनः फलं सारं यदेतज्ज्ञानसेवनम् । अनिगूहितवीर्यस्य संयमस्य च धारणम् ॥ ७ ॥
ज्ञान-ध्यानो-पवासैश्च परीषहजयैस्तथा । शील–संयमयोगैश्च स्वात्मानं भावयेत् सदा ॥ ८ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ज्ञानाभ्यासः सदा कार्यो ध्यानेना-ऽध्ययनेन च । तपसो रक्षणं चैव यदीच्छेद्धितमात्मनः ॥ ९ ॥
ज्ञानादित्यस्य सूर्यः स्याद् नित्यमुद्योतकारकः । तस्य निर्मलतां याति पञ्चेन्द्रियादिमानसम् ॥ १० ॥
एतद्ध्यान(ज्ञान)फलं नाम यच्चारित्रोद्यमः सदा । क्रियते पापनिर्मुक्तैः साधुसेवापरायणैः ॥ ११ ॥
सर्वं द्वन्द्वं परित्यज्य निभृतेनान्तरात्मना । ज्ञानामृतं सदा पेयं चित्ताह्लादनमुत्तमम् ॥ १२ ॥
ज्ञानं नाम महारत्नं यन्न प्राप्तं कदाचन । संसारे भ्रमता भीमे नानादुःखविधायिनि ॥ १३ ॥
अधुना तत् त्वया प्राप्तं सम्यग्दर्शनसंयुतम् । प्रमादं मा पुनः कार्षीर्विषयास्वादलालसः ॥ १४ ॥
आत्मानं सततं रक्षेद् ज्ञान-ध्यान-तपोबलैः । प्रमादिनोऽस्य जीवस्य शीलरत्नं विलुप्यते ॥ १५ ॥
शीलरत्नं हृतं यस्य मोहध्वान्तमुपेयुषः । नानादुःखशताकीर्णे नरके पतनं ध्रुवम् ॥ १६ ॥
यावत्स्वास्थ्यं शरीरस्य यावच्चेन्द्रियसम्पदः । तावद् युक्तं तपः कर्तुं वार्धक्ये केवलं श्रमः ॥ १७ ॥
शुद्धे तपसि सद्वीर्यं ज्ञानं कर्मपरिक्षये । उपयोगं धनं पात्रे यस्य याति स पण्डितः ॥ १८ ॥
गुरुशुश्रूषया जन्म चित्तं सद्ध्यानचिन्तया । श्रुतं यम-शमे याति विनियोगं स पुण्यभाक् ॥ १९ ॥
छित्त्वा स्नेहमयान् पाशान् भित्त्वा मोहमहार्गलम् । सच्चारित्रसमायुक्ताः शूरा मोक्षपथे स्थिताः ॥ २० ॥

मोहनीय कर्मनुं प्राबल्य

कर्मणा मोहनीयेन मोहितं सकलं जगत् । धन्या मोहं समुत्सार्य तपस्यन्ति महाधियः ॥ २१ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अहो ! मोहस्य माहात्म्यं विद्वांसो येऽपि मानवाः । मुह्यन्ति तेऽपि संसारे कामा-ऽर्थरतितत्पराः ॥ २२ ॥

### आत्माने संसारमां भ्रमण करावनार अंतरंग शत्रुओ

कामः क्रोधस्तथा लोभो रागो द्वेषश्च मत्सरः । मदो माया तथा मोहः कन्दर्पो दर्प एव च ॥ २३ ॥
एते हि रिपवो घोरा धर्मसर्वस्वधा(हा)रिणः । एतैर्वञ्भ्राम्यते जीवः संसारे बहुदुःखदे (युग्मम्) ॥ २४ ॥
राग-द्वेषमयो जीवः काम-क्रोधवशं गतः । लोभ-मोह-मदाविष्टः संसारे संसरत्यसौ ॥ २५ ॥
सम्यक्त्वज्ञानसंपन्नो जैनभक्तो जितेन्द्रियः । लोभ-मोह-मदैस्त्यक्तो मोक्षभागी न संशयः ॥ २६ ॥
कामः क्रोधस्तथा मोहस्त्रयोऽप्येते महाद्विषः । एते न निर्जिता यावत्तावत्सौख्यं कुतो नृणाम् ? ॥ २७ ॥
नास्ति कामसमो व्याधिर्नास्ति मोहसमो रिपुः । नास्ति क्रोधसमो वह्निर्नास्ति ज्ञानसमं सुखम् ॥ २८ ॥
कषायविषयार्तानां देहिनां नास्ति निर्वृतिः । तेषां च विरमे सौख्यं जायते परमाद्भुतम् ॥ २९ ॥
कषाय-विषयै रोगरात्मानं पीडितं सदा । चिकित्सतां प्रयत्नेन जिनवाक्सारभेषजैः ॥ ३० ॥
विषयोरगदष्टस्य कषायविषमोहिनः । संयमो हि महामन्त्रस्त्राता सर्वत्र देहिनः ॥ ३१ ॥
कषायकलुषो जीवो रागरञ्जितमानसः । चतुर्गतिभवाम्भोधौ भिन्ननौरिव सीदति ॥ ३२ ॥
कषायवशगो जीवः कर्म बध्नाति दारुणम् । तेनासौ क्लेशमाप्नोति भवकोटिषु दुस्तरम् ॥ ३३ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

कषाय-विषयैश्चित्तं मिथ्यात्वेन च संयुतम् । संसारबीजतां याति न याति मोक्षबीजताम् ॥ ३४ ॥
कषायविजये सौख्यमिन्द्रियाणां च निग्रहे । जायते परमोत्कृष्टमात्मनो भवभेदि यत् ॥ ३५ ॥
कषायान् शत्रुवत् पश्येद् विषयान् विषवत्तथा । मोहं च परमं व्याधिमेवमूचुर्विचक्षणाः ॥ ३६ ॥
कषाय-विषयैश्चौरैर्धर्मरत्नं विलुप्यते । वैराग्यखड्गधाराभिः शूराः कुर्वन्ति रक्षणम् ॥ ३७ ॥

समकितनी श्रेष्ठिता, अने तेने सेववानो उपदेश

कषायकर्षणं कृत्वा विषयाणामसेवनम् । एतद्धि मानवाः ! पथ्यं सम्यग्दर्शनमुत्तमम् ॥ ३८ ॥
कषायातपतप्तानां विषयामयमोहिनाम् । संयोगाऽयोगखिन्नानां सम्यक्त्वं परमं हितम् ॥ ३९ ॥
वरं नरकवासोऽपि सम्यक्त्वेन समायुतः । न तु सम्यक्त्वहीनस्य निवासो दिवि राजते ॥ ४० ॥
सम्यक्त्वेन हि युक्तस्य ध्रुवं निर्वाणसङ्गमः । मिथ्यादृशोऽस्य जीवस्य संसारे भ्रमणं सदा ॥ ४१ ॥
सम्यक्त्वं परमं रत्नं शङ्कादिमलवर्जितम् । संसारदुःखदारिद्र्यं नाशयेत् सुविनिश्चितम् ॥ ४२ ॥
पण्डितोऽसौ विनीतोऽसौ धर्मज्ञः प्रियदर्शनः । यः सदाचारसम्पन्नः सम्यक्त्वदृढमानसः ॥ ४३ ॥
जरा-मरणरोगाणां सम्यक्त्व-ज्ञानभेषजैः । शमनं कुरुते यस्तु स वै वैद्योऽभिधीयते ॥ ४४ ॥
जन्मान्तरार्जितं कर्म सम्यक्त्व-ज्ञान-संयमैः । निराकर्तुं सदा युक्तमपूर्वस्य निरोधनम् ॥ ४५ ॥



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

सम्यक्त्वं भावयेत् क्षिप्रं सज्ज्ञानं चरणं तथा। कृच्छ्रात् सुचरितं प्राप्तं नृत्वं याति निरर्थकम् ॥४६॥
अतीतेनापि कालेन यन्न प्राप्तं कदाचन । तदिदानीं त्वया प्राप्तं सम्यग्दर्शनमुत्तमम् ॥४७॥
उत्तमे जन्मनि प्राप्ते चारित्रं कुरु यत्नतः । सद्धर्मे च परां भक्तिं शमे च परमां रतिम् ॥४८॥
अनादिकालं जीवेन प्राप्तं दुःखं पुनः पुनः । मिथ्यामोहपरीतेन कषायवशवर्तिना ॥४९॥
सम्यक्त्वादित्यसंभिन्नं कर्मध्वान्तं विनश्यति । आसन्नभव्यसत्त्वानां याललब्ध्यादिसन्निधौ ॥५०॥
सम्यक्त्वभावशुद्धेन विषयासङ्गवर्जिना । कषायविरतेनैव भवदुःखं विहन्यते ॥५१॥
संसारध्वंसनं प्राप्य सम्यक्त्वं नाशयन्ति ये । वमन्ति तेऽमृतं पीत्वा सर्वव्याधिहरं पुनः ॥५२॥

मिथ्यात्वनी दुष्टता अने तेने त्यागवानो उपदेश

मिथ्यात्वं परमं बीजं संसारस्य दुरात्मनः । तस्मात्तदेव मोक्तव्यं मोक्षसौख्यं जिघृक्षुणा ॥५३॥
आत्मतत्त्वं न जानन्ति मिथ्यामोहेन मोहिताः। मनुजा येन मानस्था विप्रलब्धाः कुशासनैः ॥५४॥
दुःखाच्च भीरवोऽप्येते सुधर्मं नहि कुर्वते । कर्मणा मोहनीयेन मोहिता बहवो जनाः ॥५५॥
कथं न रमते चित्तं धर्मेऽनेकसुखप्रदे । जीवानां दुःखभीरूणां प्रायो मिथ्यादृशो यतः ॥५६॥
दुःखं न शक्यते सोढुं पूर्वकर्मार्जितं नरैः। तस्मात् कुरुत सद्धर्मं येन तत्कर्म नश्यति ॥५७॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

### धर्म करवानो उपदेश

सुकृतं तु भवेद् यस्य तेन यान्ति परिक्षयम् । दुःखोत्पादनभूतानि दुष्कर्माणि समन्ततः ॥ ५८ ॥
धर्म एव सदा कार्यो मुक्त्वा व्यापारमन्यः । यः करोति परं सौख्यं यावन्निर्वाणसङ्गमम् ॥ ५९ ॥
क्षणे हि समतिक्रान्ते सद्धर्मपरिवर्जिते । आत्मानं मुषितं मन्ये कषायेन्द्रियतस्करैः ॥ ६० ॥
धर्मकार्ये मतिस्तावद् यावदायुर्दृढं तव । आयुःकर्मणि संक्षीणे पश्चात्त्वं किं करिष्यसि ? ॥ ६१ ॥
धर्ममाचर यत्नेन मा भव त्वं मृतोपमः । सद्धर्मचेतसां पुंसां जीवितं सफलं भवेत् ॥ ६२ ॥
मृता नैव मृतास्तेऽत्र ये नरा धर्मकारिणः । जीवन्तोऽपि मृतास्ते वै ये नराः पापकारिणः ॥ ६३ ॥
धर्मामृतं सदा पेयं दुःखातङ्कविनाशनम् । यस्मिन् पीते परं सौख्यं जीवानां जायते सदा ॥ ६४ ॥
स धर्मो यो दयायुक्तः सर्वप्राणिहितप्रदः । स एवोत्तारणे शक्तो भवाम्भोधेः सुदुस्तरात् ॥ ६५ ॥
यदा कण्ठगतप्राणो जीवोऽसौ परिवर्तते । नाऽन्यः कश्चित्तदा त्राता मुक्त्वा धर्मं जिनोदितम् ॥ ६६ ॥
अल्पायुषा नरेणेह धर्मकर्माऽविजानता । न ज्ञायते कदा मृत्युर्भविष्यति न संशयः ॥ ६७ ॥

### आयुष्यनी अनित्यता

आयुर्यस्यापि दैवज्ञैः परिज्ञाते हि आतंके । तस्यापि क्षीयते सद्यो निमित्तान्तरसम्भवैः ॥ ६८ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

### जिनेन्द्र प्ररूपित धर्मथी सुखनी प्राप्ति, अने दुःखनो विनाश

जिनेनाभिहितं धर्मं सर्वसौख्यमहानिधिं । ये न तत्प्रतिपद्यन्ते तेषां जन्म निरर्थकम् ॥ ६९ ॥
हितं कर्म परित्यज्य पापकर्मसु रज्यते । तेन वै दह्यते यतः शोचनीयो भविष्यति ॥ ७० ॥
यदि नामाऽप्रियं दुःखं सुखं च यदि वा प्रियम् । ततः कुरुत सद्धर्मं जिनानां जितजन्मनाम् ॥ ७१ ॥
विशुद्धादेव सङ्कल्पाद् धर्मः सद्भिरुपार्ज्यते । स्वल्पेनैव प्रयासेन चित्रमेतदहो ! परम् ॥ ७२ ॥
धर्म एव सदा त्राता जीवानां दुःखसङ्कटात् । तस्मात् कुरुत भो यत्नं तत्राऽनन्तसुखप्रदे ॥ ७३ ॥
यत्त्वया न कृतो धर्मः सदा मोक्षसुखावहः । प्रसन्नमनसा येन तेन दुःखी भवानिह ॥ ७४ ॥
यत्त्वया क्रियते कर्म विषयान्धेन दारुणम् । उदये तस्य संप्राप्ते कस्ते त्राता भविष्यति ? ॥ ७५ ॥

### भोगथी अतृप्ति, तेने त्याग करवानो उपदेश

भुक्त्वाऽप्यनन्तशो भोगान् देवलोके यथेप्सितान् । यो हि तृप्तिं न संप्राप्तः स किं प्राप्स्यति सांप्रतम् ॥ ७६ ॥
वरं हालाहलं भुक्तं विषं तद्भवनाशनम् । न तु भोगविषं भुक्तमनन्तभवदुःखदम् ॥ ७७ ॥

### इन्द्रियोने काबुमां राखवानो उपदेश

---

१ धर्मशब्दो नपुंसकोऽप्यस्ति ।

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

इन्द्रियप्रभवं सौख्यं सुखाभासं न तत्सुखम् । तच्च कर्मविबन्धाय दुःखदानैकपण्डितम् ॥ ७८ ॥
अक्षाश्वान् निश्चलान् धत्स्व विषयोत्पथगामिनः । वैराग्यप्रग्रहाकृष्टान् सन्मार्गे विनियोजय ॥ ७९ ॥
अक्षाण्येव स्वकीयानि शत्रवो दुःखहेतवः । विषयेषु प्रवृत्तानि कषायवशवर्तिनः ॥ ८० ॥
इन्द्रियाणां यदा छन्दे वर्तते मोहसङ्गतः । तदात्मैव भवेच्छत्रुरात्मनो दुःखबन्धकः ॥ ८१ ॥
इन्द्रियाणि प्रवर्तन्ते विषयेषु निरन्तरम् । सज्ज्ञानभावनासक्ता वारयन्ति हि ते रताः ॥ ८२ ॥
इन्द्रियेच्छारुजामज्ञः कुरुते यो ह्युपक्रमम् । तमेव मन्यते सौख्यं किं नु कष्टमतः परम् ॥ ८३ ॥
आत्माभिलाषरागाणां यः श्रमः क्रियते बुधः । तदेव परमं तत्त्वमित्यूचुर्ब्रह्मवेदिनः ॥ ८४ ॥
इन्द्रियाणां शमेनाऽलं राग–द्वेषजयेन च । आत्मानं योजयेत् सम्यक् संसृतिच्छेदकारणम् ॥ ८५ ॥
इन्द्रियाणि वशे यस्य यस्य दुष्टं न मानसम् । आत्मा धर्मरतो यस्य सफलं तस्य जीवितम् ॥ ८६ ॥

जगत्मां सत्पुरुषो कोण ?

परनिन्दासु ये मूका निजश्लाघापराङ्मुखाः । ईदृशैर्ये गुणैर्युक्ताः पूज्याः सर्वत्र विष्टपे ॥ ८७ ॥
प्राणनाशेऽपि संप्राप्ते वर्जनीयानि साधुना । परलोकविरुद्धानि येनात्मा सुखमश्नुते ॥ ८८ ॥
संमानयति भूतानि यः सदा विनियान्वितः । स प्रियः सर्वलोकेऽस्मिन् नापमानं समश्नुते ॥ ८९ ॥



P.P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

### विषयना त्यागनो उपदेश

किंपाकस्य फलं भक्ष्यं कदाचिदपि धीमता । विषयास्तु न भोक्तव्या यद्यपि स्युः सुपेशलाः ॥९०॥
स्त्रीणां सम्पर्कजं सौख्यं वर्णयन्त्यबुधा जनाः । विचार्यमाणमेतद्धि दुःखानां बीजमुत्तमम् ॥९१॥

### कामनी विडम्बना

स्मराग्निना प्रदग्धानि शरीराणि शरीरिभिः । शमाम्भसा प्रसिक्तानि निर्वृत्तिं नैव भेजिरे ॥९२॥
अग्निना तु प्रदग्धानां शमोऽस्तीति यतोऽत्र वै । स्मरवह्निप्रदग्धानां शमो नास्ति भवेष्वपि ॥९३॥
मदनोऽस्ति महाव्याधिर्दुश्चिकित्स्यः सदा बुधैः । संसारवर्धनोऽत्यर्थं दुःखोत्पादनतत्परः ॥९४॥
यावदस्य हि कामाग्निर्हृदये प्रज्वलत्यलम् । आश्रयन्ति हि कर्माणि तावदस्य निरन्तरम् ॥९५॥
कामाऽहिदृढदष्टस्य तीव्रा भवति वेदना । यया सुमोहितो जन्तुः संसारे परिवर्तते ॥९६॥
दुःखानामाकरो यस्तु संसारस्य च वर्धनः । स एष मदनो नाम नराणां स्मृतिसूदनः ॥९७॥
सङ्कल्पाण्डात् समुद्भूतः कामसर्पोऽतिदारुणः । रागद्वेषद्विजिह्वोऽसौ वशीकर्तुं न शक्यते ॥९८॥
दुष्टा पंचमर्मूच्छा सेयं संसारवर्धनी । दुःखस्योत्पादने शक्ता शक्ता वित्तस्य नाशने ॥९९॥
अहो ! ते धिषणाहीना ये स्मरस्य वशं गताः । कृत्वा कल्मषमात्मानं पातयन्ति भवार्णवे ॥१००॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

स्मरेणाऽतीवरौद्रेण नरकावर्तपातिना । अहो ! खलीकृतौ लोकौ धर्मामृतपराङ्मुखः ॥१०१॥
स्मरेण स्मरणादेव वैरं दैवनियोगतः । हृदये निहितं शल्यं प्राणिनां तापकारकम् ॥१०२॥
तस्मात् कुरुत सद्वृत्तं जिनमार्गरताः सदा । येन शतखण्डशो याति स्मरशल्यं सुदुर्धरम् ॥१०३॥
चित्तसंदूषणः कामस्तथा सद्गतिनाशनः । सद्वृत्तध्वंसनश्चासौ कामोऽनर्थपरम्परा ॥१०४॥
दोषाणामाकरः कामो गुणानां च विनाशकृत् । पापस्य च निजो बन्धुरापदां चैव सङ्गमः ॥१०५॥
पिशाचेनैव कामेन च्छलितं सकलं जगत् । बम्भ्रमीति परायत्तं भवाब्धौ तन्निरन्तरम् ॥१०६॥
वैराग्यभावनामन्त्रैस्तं निवार्य महाबलम् । स्वच्छन्दवृत्तयो धीराः सिद्धिसौख्यं प्रपेदिरे ॥१०७॥
कामी त्यजति सद्वृत्तं गुरोर्वाणीं ह्रियं तथा । गुणानां समुदायं च चेतःस्वास्थ्यं तथैव च ॥१०८॥
तस्मात् कामः सदा हेयो मोक्षसौख्यं जिघृक्षुभिः । संसारं च परित्यक्तुं वाञ्छद्भिर्यतिसत्तमैः ॥१०९॥
कामार्थौ वरिणौ नित्यं विशुद्धध्यानरोधिनौ । संत्यजतां महाक्रूरौ सुखं संजायते नृणाम् ॥११०॥
कामदाहो वरं सोढुं न तु शीलस्य खण्डनम् । शीलखण्डनशीलानां नरके पतनं ध्रुवम् ॥१११॥
कामभोगः सदा नैव स्वल्पकामेन शाम्यति । सेवनाच्च महत्पापं नरकावर्तपातनम् ॥११२॥
सुतीव्रेणापि कामेन स्वल्पकालं तु वेदनाः । खण्डनेन तु शीलस्य भवकोटिषु वेदनाः ॥११३॥

कामने शांत करवाना उपायो



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

नियतं प्रशमं याति कामदाहः सुदारुणः । ज्ञानोपयोगसामर्थ्याद् विषं मन्त्रपदैर्यथा ॥११४॥
असेवनमनङ्गस्य शमाय परमं स्मृतम् । सेवनाच्च परा वृद्धिः शमस्तु न कदाचन ॥११५॥
उपवासोऽवमौदर्यं रसानां त्यजनं तथा । स्नानस्याऽसेवनं चैव ताम्बूलस्य च वर्जनम् ॥११६॥
असेवेच्छानिरोधस्तु ज्ञानस्य स्मरणं तथा । एते हि निर्जरोपाया मदनस्य महारिपोः ॥ युग्मम् ॥११७॥
काममिच्छानिरोधेन क्रोधं च क्षमया भृशम् । जयेन्मानं मृदुत्वेन मोहं सज्ज्ञानसेवया ॥११८॥
तस्मिन्नुपशमं प्राप्ते युक्तं सद्वृत्तधारणम् । तृष्णां सुदुरतस्त्यक्त्वा विषाक्तमिव भोजनम् ॥११९॥
कर्मणां शोधनं श्रेष्ठं ब्रह्मचर्यं सुरक्षितम् । सारभूतं चरित्रस्य देवैरपि सुपूजितम् ॥१२०॥

स्त्रीओनी असारता

या चैषा प्रमदा भाति लावण्यजलवाहिनी । सैषा वैतरणी घोरा दुःखोर्मिशतसङ्कुला ॥१२१॥
संसारस्य च वीजानि दुःखानां राशयः पराः । पापस्य च निधानानि निर्मिताः केन योषितः ? ॥ १२२ ॥
इयं सा मदनज्वाला वह्नेरेव समुद्भवा । नराणां यत्र हूयन्ते यौवनानि धनानि च ॥ १२३ ॥
नरकावर्तपातिन्यः स्वर्गमार्गदृढाऽर्गलाः । अनर्थानां विधायिन्यो योषितः केन निर्मिताः ? ॥ १२४ ॥
कृमिजालशताकीर्णे दुर्गन्धमलपूरिते । त्वङ्मात्रसंवृते स्त्रीणां काये का रमणीयता ? ॥ १२५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अहो ! ते सुखिनो भव्या ये कामामलवर्जिताः । सद्वृत्तं विधिनाऽऽपाल्य यास्यन्ति पदमुत्तमम् ॥१२६॥
भोगार्थी यः करिष्यामि निदानं मोहसङ्गतः । चूर्णीकरिष्यसौ रत्नमनर्घ्यं सूत्रहेतुना ॥१२७॥

वैराग्य भावनाथी कर्मशत्रुनो नाश

भवभोगशरीरेषु भावनीयः सदा बुधः । निर्वेदः परया बुद्ध्या कर्मारातिजिगीषुभिः ॥१२८॥
यावन्न मृत्युवज्रेण देहशैलो निपात्यते । नियुज्यतां मनस्तावत् कर्मारातिपरिक्षये ॥१२९॥
त्यज कामार्थयोः सङ्गं धर्मध्यानं सदा भज । छिन्धि स्नेहमयान् पाशान् मानुष्यं प्राप्य दुर्लभम् ॥१३०॥

सदाचारथी भ्रष्ट थयेला अने विषयोमां लंपट बनेला प्राणीओ आ लोक अने परलोकमां दुःखी थाय छे

कथं ते भ्रष्टसद्वृत्ता विषयानुपसेवते(न्ते) । पश्चात्तापान्विता येषां नरके तीव्रवेदना ॥१३१॥
सद्वृत्तात् भ्रष्टचित्तानां विषयासक्तचेतसाम् । तेषामिहैव दुःखानि भवन्ति नरकेषु च ॥१३२॥
विषयासक्तचित्तेन रागद्वेषवशात्मना । आत्मा सुरक्षितस्तेन यः शर्म नाभिसेवते ॥१३३॥

कर्मोना आश्रवोने रुंधवानो अने इन्द्रियोने वश करवानो उपदेश

आत्मना यत्कृतं कर्म भोक्तव्यं तदनेकधा । तस्मात् कर्माश्रवं रुद्ध्वा सर्वेन्द्रियाणि वशं नय ॥१३४॥
इन्द्रियप्रसरं रुद्ध्वा स्वात्मानं वशमानय । येन निर्वाणसौख्यस्य भाजनत्वं प्रपत्स्यसे ॥१३५॥



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

भोगनी लालसा त्यागवानो उपदेश

सम्पन्नेष्वपि भोगेषु महतां नास्ति गृध्नुता । अन्येषां गृद्धिरेवाऽस्ति शमस्तु न कदाचन ॥ १३६ ॥
षट्खण्डाधिपतिश्चक्री परित्यज्य वसुन्धराम् । तृणवत् सर्वभोगांश्च दीक्षां भागवतीं श्रितः ॥ १३७ ॥
कृमितुल्यैः किमस्माभिर्मोक्तव्यं वस्तु सुन्दरम् । येनात्र गृहपङ्केषु सीदामः किमनर्थकम् ? ॥ १३८ ॥
येन ते जनितं दुःखं भवाम्भोधौ सुदुस्तरम् । तं कर्मारातिमत्युग्रं विजेतुं किं न वाञ्छसि ? ॥ १३९ ॥
अब्रह्मचारिणो नित्यं मांसभक्षणतत्पराः । शुचित्वं तेऽपि मन्यन्ते किं नु चित्रमतः परम् ? ॥ १४० ॥
येन संक्षीयते कर्म संचयश्च न जायते । तदेवात्मविदा कार्यं मोक्षसौख्याभिलाषिणा ॥ १४१ ॥

चार गतिरूप संसारमां अनेक प्रकारनां सुख दुःख भोगव्या छतां वैराग्य नहीं पामवाथी जीवने उपालंभ

अनेकशस्त्वया प्राप्ता विविधा भोगसम्पदः । अप्सरागणसङ्कीर्णे दिवि देवविराजिते ॥ १४२ ॥
पुनश्च नरके रौद्रे रौरवेऽत्यन्तभीतिदे । नानाप्रकारदुःखौघे संस्थितोऽसि विधेर्वशात् ॥ १४३ ॥
तप्ततैलकभल्लीषु पच्यमानेन यत्त्वया । संप्राप्तं परमं दुःखं तद्वक्तुं नैव पार्यते ॥ १४४ ॥
नानायन्त्रेषु रौद्रेषु पीड्यमानेन वह्निना । दुःसहा वेदना प्राप्ता पूर्वकर्मनियोगतः ॥ १४५ ॥
विण्मूत्रपूरिते भीमे पूति-श्लेष्म-वसाकुले । भूयो गर्भगृहे मातुर्दैवाद् यातोऽसि संस्थितिम् ॥ १४६ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तिर्यग्गतौ च यद्दुःखं प्राप्तं छेदन–भेदनैः । न शक्तस्तत्पुमान् वक्तुं जिह्वाकोटिशतैरपि ॥१४७॥
संसृतौ नास्ति तत्सौख्यं यन्न प्राप्तमनेकधा । देव–मानव–तिर्यक्षु भ्रमता जन्तुनाऽनिशम् ॥१४८॥
चतुर्गतिनिबन्धेऽस्मिन् संसारेऽत्यन्तभीतिदे । सुख–दुःखान्यवाप्तानि भ्रमता विधियोगतः ॥१४९॥
एवं चिरमिद कष्टं ज्ञात्वाऽत्यन्तविनश्वरम् । कथं न यासि वैराग्यं ? धिगस्तु तव जीवितम् ॥१५०॥

जगत्मां सर्ववस्तु अनित्य होवाथी ममत्व राखी राग नहीं करवानो उपदेश

जीवितं विद्युता तुल्यं संयोगाः स्वप्नसन्निभाः । सन्ध्यारागसमः स्नेहः शरीरं तृणबिन्दुवत् ॥१५१॥
इन्द्रचापसमा भोगाः सम्पदो जलदोपमाः । यौवनं जलरेखेव सर्वमेतदशाश्वतम् ॥१५२॥
समानवयसो दृष्ट्वा मृत्युना स्ववशीकृतान् । कथं चैतत्समो नास्ति मनागपि हितात्मनः ॥१५३॥
सर्वाऽशुचिमये काये नश्वरे व्याधिपीडिते । को हि विद्वान् रतिं गच्छेद् यस्याऽस्ति श्रुतसङ्गमः ॥१५४॥
चिरं सुपोषितः कायो भोजनाच्छादनादिभिः । विकृतिं याति सोऽप्यन्ते काऽऽस्था बाह्येषु वस्तुषु ? ॥१५५॥
नायातो बन्धुभिः सार्धं न गतो बन्धुभिः समम् । वृथैव स्वजनैः स्नेहो जनानां मूढचेतसाम् ॥१५६॥
जातेनाऽवश्यमर्तव्यं प्राणिना प्राणधारिणा । अतः कुरुत मा शोकं मृते बन्धुजने बुधाः ! ॥१५७॥

जे स्वस्वभाव छोडी परभावमां लीन रहे छे ते पोताना हितथी चूके छे

आत्मकार्यं परित्यज्य परकार्येषु यो रतः । ममत्वरतचेताः स स्वहिताद् भ्रंशमेष्यति ॥१५८॥



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

आत्मानुं स्वहित शुं ?

स्वहितं तु भवेज्ज्ञानं चारित्रं दर्शनं तथा । तपःसंरक्षणं चैव सर्वविद्भिस्तदुच्यते ॥१५९॥

सांसारिक सुखमां लंपट बनेला मनने उपालंभ

वियोगान् विविधान् दृष्ट्वा द्रव्याणां च परिक्षयम् । तथापि निर्घृणं चेतः सुखास्वादनलम्पटम् ॥१६०॥

सुखसंभोगसंमूढा विषयास्वादलम्पटाः । स्वहिताद् भ्रंशमागत्य गृहवासं सिषेविरे ॥१६१॥

ज्ञानी पुरुषे केवुं कार्य करवुं ?

यथा च जायते सम्यक् चेतःशुद्धिः सुनिर्मला । तथा ज्ञानविदा कार्यं प्रयत्नेनापि भूरिणा ॥१६२॥

विशुद्धं मानसं यस्य रागादिमलवर्जितम् । संसाराग्र्यं फलं तस्य सकलं समुपस्थितम् ॥१६३॥

संसारध्वंसने हृष्टिं धृतिमिन्द्रियनिग्रहे । कषायविजये यत्नं नाऽभव्यो लब्धुमर्हति ॥१६४॥

परब्रह्म एटले शुं ?

एतदेव परं ब्रह्म न विदन्तीह मोहिनः । यदेतच्चित्तनैर्मल्यं राग-द्वेषादिवर्जितम् ॥१६५॥

आपत्तिमां पण मनने विकृत नहीं करवानो उपदेश

तथाऽनुष्ठेयमेतद्धि पण्डितेन हितैषिणा । यथा न विक्रियां याति मनोऽत्यर्थं विपत्स्वपि ॥१६६॥

धन्यास्ते मानवा लोके ये प्राप्याऽप्यापदान्तरम् । विकृतिं नैव गच्छन्ति यतस्ते साधुमानसाः ॥१६७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

संक्लेशो न हि कर्तव्यः संक्लेशो बन्धकारणम् । संक्लेशपरिणामेन जीवो दुःखस्य भाजनम् ॥१६८॥
संक्लेशपरिणामेन जीवः प्राप्नोति भूरिशः । सुमहाकर्मसम्बन्धं भवकोटिसुदुःखदम् ॥१६९॥
चित्तरत्नमसंक्लिष्टं महतामुत्तमं धनम् । येन संप्राप्यते स्थानं जरा-मरणवर्जितम् ॥१७०॥

महा पुरुष कोने कहेवा ?

सम्पत्तौ विस्मिता नैव विपत्तौ नैव दुःखिताः । महतां लक्षणं ह्येतद् न तु द्रव्यसमागमात् ॥१७१॥
आपत्सु संपतन्तीषु पूर्वकर्मनियोगतः । धैर्यमेव परं त्राणं न युक्तमनुशोचनम् ॥१७२॥

निर्मल मनथी शान्ति रहे छे, अने क्लिष्ट मनथी भवांतरमां पण अशान्ति ज रहे छे

विशुद्धपरिणामेन शान्तिर्भवति सर्वतः । संक्लिष्टेन तु चित्तेन नास्ति शान्तिर्भवेष्वपि ॥१७३॥
संक्लिष्टचेतसां पुंसां संसारो याति वृद्धिताम् । विशुद्धा चेतसो वृत्तिः सम्पत्ति-वृत्तिदायिनी ॥१७४॥
यदा चित्तविशुद्धिः स्यादापदः सम्पदस्तदा । समास्तत्त्वविदां पुंसां सर्वं हि महतां महत् ॥१७५॥

उन्मार्गे जता मनने रोकवानो उपदेश

परोऽप्युत्पथमापन्नो निषेद्धुं युक्त एव सः । किं पुनः स्वमनोऽत्यर्थं विषयोत्पथयायि यत् ॥१७६॥
अज्ञानाद् यदि वा मोहाद् यत्कृतं कर्म कुत्सितम् । व्यावर्तयेन्मनस्तस्मात् पुनस्तन्न समाचरेत् ॥१७७॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पोते करेलां कर्मनां फळ पोताने ज भोगववां पडे छे

अचिरेणैव कालेन फलं प्राप्स्यसि दुर्मते ! । विपाकेऽतीवतिक्तस्य कर्मणो यत्त्वया कृतम् ॥१७८॥

स्वल्पेनैव हि कालेन फलं प्राप्स्यसि यत्कृतम् । शशवदात्मकर्णाभ्यां गोपयन् स्वं मनागपि ॥१७९॥

वर्धमानाऽहितं कर्म अज्ञानाद्यो न शोषयेत् । प्रभूतदुःखसंग्रस्तः स पश्चात् परितप्यते ॥१८०॥

सुखभावकृता मूढाः किं न कुर्वन्ति मानवाः । येन संतापमायान्ति जन्मकोटिशतेष्वपि ॥१८१॥

परने ठगनारो प्राणी पोताना ज आत्माने ठगे छे

परं च वञ्चयामीति ये हि मायां प्रयुञ्जते । इहाऽन्यत्र च लोके वै तैरात्मा वञ्चितः सदा ॥१८२॥

मनुष्यपणुं प्राप्त थवा छतां जे पुण्योपार्जन करतो नथी, तथा कर्म खपावतो नथी तेनो जन्म निष्फळ छे

पञ्चताऽऽसन्नतां प्राप्ता न कृतं सुकृतार्जनम् । सुमानुष्ये हि संप्राप्ते हा ! गतं जन्म निष्फलम् ॥१८३॥

कर्मपाशविमोक्षाय यत्नो यस्य न देहिनः । स संसारमहागुप्तौ बद्धः संतिष्ठते सदा ॥१८४॥

गृहचारकवासेऽस्मिन् विषयामिषलोभिनः । सीदन्ति नरशार्दूला बद्धा बान्धवबन्धनैः ॥१८५॥

गर्भवासेऽपि यद्दुःखं प्राप्तमत्रैव जन्मनि । अधुना विस्मृतं किं ते येनात्मानं न बुध्यसे ? ॥१८६॥

चतुरशीतिलक्षेषु योनीनां भ्रमता त्वया । प्राप्तानि दुःखशल्यानि नानाकाराणि मोहिना ॥१८७॥

कथं नोद्विजसे मूढ ! दुःखात् संसृतिसंभवात् । येन त्वं विषयासक्तो लोभेनाऽसि वशीकृतः ॥१८८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यस्त्वयोपार्जितं कर्म भवकोटिषु पुष्कलम् । तच्छेत्तुं नैव शक्नोषि गतं ते जन्म निष्फलम् ॥१८९॥

अज्ञानी प्राणी जे कर्म करोडो भवमां न खपावी शके ते कर्म ज्ञानी अन्तर्मुहूर्तमां खपावे छे

अज्ञानी क्षपयेत् कर्म यज्जन्मशतकोटिभिः । तज्ज्ञानी तु त्रिगुप्तात्मा निहन्त्यन्तर्मुहूर्तके ॥१९०॥

जन्मनुं फल शुं ?

जीवितेनापि किं तेन कृता यत्र न निर्जरा । कर्मणां संवरो वाऽपि संसाराऽसारकारिणाम् ॥१९१॥

स जातो येन जातेनाऽपक्वानां पाचनं कृतम् । कर्मणां पाकघोराणां विबुधेन महात्मना ॥१९२॥

रोष अने मान कोना उपर करवा ?, तथा संग कोनो त्यजवो ते कहे छे

रोषे रोषं परं कृत्वा माने मानं विधाय च । सङ्गे सङ्गं परित्यज्य स्वात्माधीनं सुखं कुरु ॥१९३॥

द्वेष कोना उपर करवो ? तथा प्रीति, यत्न अने चित्तनी एकाग्रता कोना उपर राखवी ?

परिग्रहे महाद्वेषो मुक्तौ च रतिरुत्तमा । सद्ध्याने चित्तमेकाग्रं रौद्रार्ते नैव संस्थितम् ॥१९४॥

धर्मस्य संचये यत्नं कर्मणां च परिक्षये । साधूनां चेष्टिते चित्तं सर्वदा पापनाशने ॥१९५॥

महात्माओनुं कर्तव्य

मानस्तम्भं दृढं भङ्क्त्वा लोभाद्रिं प्रविदार्य च । मायावल्लीं समुत्पाट्य क्रोधशत्रुं निहत्य च ॥१९६॥

यथाख्यातं हितं प्राप्य चारित्रं ध्यानतत्पराः । कर्मणां प्रक्षयं कृत्वा प्रपन्नाः परमं पदम् ॥१९७॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धीर कोने कहेवा ?

सञ्ज्ञादिरहिता धीरा रागादिमलवर्जिताः । शान्ता दान्तास्तपोभूषा मुक्तिकाङ्क्षणतत्पराः ॥१९८॥

सुपात्र कोण ?

मनोवाक्काययोगेषु प्रणिधानपरायणाः । वृत्ताढ्या ज्ञानसम्पन्नास्ते पात्रं दातुरुत्तमाः ॥१९९॥

धृतिभावनया युक्ताः सत्त्वभावनयाऽन्विताः । तत्त्वार्थहितचेतस्कास्ते पात्रं करुणापराः ॥२००॥

धृतिभावनया दुःखं सत्त्वभावनया भवम् । ज्ञानभावनया कर्म नाशयन्ति न संशयः ॥२०१॥

आग्रहो हि शमे येषां विग्रहः कर्मशत्रुभिः । विषयेषु निराशंसा ते पात्रं यतिसत्तमाः ॥२०२॥

निःसङ्गा अपि वृत्ताढ्या निःस्नेहाः सुश्रुतिप्रियाः । अभूषाश्च तपोभूषास्ते पात्रं योगिनः सदा ॥२०३॥

यैर्ममत्वं सदा त्यक्तं स्वकायेऽपि मनीषिभिः । ते पात्रं संयतात्मानः सर्वसत्त्वहिते रताः ॥२०४॥

सुमुनिओ उपर ईर्ष्या राखनारनी धर्मक्रियाओ पण निष्फळ थाय छे

परीषहजये शक्तं शक्तं कर्मपरिक्षये । ज्ञान-ध्यान-तपोभूषं शुद्धाचारपरायणम् ॥२०५॥

प्रशान्तमानसं सौम्यं प्रशान्तकरणं शुभम् । प्रशान्तारिमहामोहं काम-क्रोधनिषूदनम् ॥२०६॥

निन्दा-स्तुतिसमं धीरं शरीरेऽपि च निःस्पृहम् । जितेन्द्रियं जितक्रोधं जितलोभमहाभयम् ॥२०७॥

राग-द्वेषविनिर्मुक्तं सिद्धिसङ्गमनोत्सुकम् । ज्ञानाभ्यासरतं नित्यं नित्यं च प्रशमे स्थितम् ॥२०८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

एवंविधं हि यो दृष्ट्वा स्वगृहाङ्गणमागतम्। मात्सर्यं कुरुते मोहात् क्रिया तस्य न विद्यते ॥२०९॥
मायानिरसनं कृत्वा तृष्णां च परित्यज्य ते। राग-द्वेषौ समुत्सार्य प्रयाताः पदमक्षयम् ॥२१०॥

वास्तविक धीर मुनिओ ज छे

धीराणां यतयो धीरा ये निराकुलचेतसः। कर्मशत्रुमहासैन्यं निर्जयन्ति तपोबलात् ॥२११॥

शूरवीर कोण ?

परीषहजये शूराः शूराश्चेन्द्रियनिग्रहे। कषायविजये शूरास्ते शूरा गदिता बुधैः ॥२१२॥
नादत्तेऽभिनवं कर्म सच्चारित्रनिविष्टधीः। पुराणं निर्जयेद् बाढं विशुद्धध्यानसङ्गतः ॥२१३॥

पंडित कोण कहेवाय ?

संसारावासनिर्वृत्ताः शिवसौख्यसमुत्सुकाः। सद्भिस्ते गदिताः प्राज्ञाः शेषास्त्वर्थस्य वञ्चकाः ॥२१४॥
समतां सर्वभूतेषु यः करोति सुमानसः। ममत्वभावनिर्मुक्तो यात्यसौ पदमव्ययम् ॥२१५॥

वास्तविक शूरवीर कोण ?

इन्द्रियाणां जये शूरः कर्मबन्धे च कातरः। तत्त्वार्थाहितचेतस्कः स्वशरीरेऽपि निःस्पृहः ॥२१६॥
परीषहमहारातिबलनिर्दलनक्षमः। कषायविजये शूरः स शूर इति कथ्यते ॥ युग्मम् ॥ ॥२१७॥
संसारध्वंसिनीं चर्यां ये कुर्वन्ति सदा नराः। राग-द्वेषहतिं कृत्वा ते यान्ति परमं पदम् ॥२१८॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मलैस्तु रहिता धीरा मलादग्धाङ्गयष्टयः । ते ब्रह्मचारिणो नित्यं ज्ञानाभ्यासं सिषेविरे ॥२१९॥
ज्ञानभावनया शक्ता निभृतेनान्तरात्मना । अप्रमत्तं गुणं प्राप्य लभन्ते हितमात्मनः ॥२२०॥

प्रशंसापात्र जीवित कोनुं ?

संसारावासभीरूणां त्यक्तान्तर्बाह्यसङ्गिनाम् । विषयेभ्यो निवृत्तानां श्लाघ्यं तेषां हि जीवितम् ॥२२१॥

जे सुश्रमणने गुरु तरीके मानतो नथी ते पामेलो अमूल्य मनुष्य जन्म हारी जाय छे

समं शत्रौ च मित्रे च समं मानापमानयोः । लाभालाभे समं नित्यं लोष्ठ–काञ्चनयोस्तथा ॥२२२॥
सम्यक्त्वभावनाशुद्धं ज्ञानसेवापरायणम् । चारित्रचरणासक्तमक्षीणसुखकाङ्क्षिणम् ॥२२३॥
ईदृशं श्रमणं दृष्ट्वा यो न मन्येत दुष्टधीः । नृजन्मनः फलं सारं स हारयति सर्वथा ॥ त्रिभिर्विशेषकम् ॥ ॥२२४॥
रागादिवर्जकाः सङ्गं परित्यज्य दृढव्रताः । धीरा निर्मलचेतस्कास्तपस्यन्ति महाधियः ॥२२५॥
संसारोद्विग्नचित्तानां निःश्रेयससुखैषिणाम् । सर्वसङ्गनिवृत्तानां धन्यं तेषां हि जीवितम् ॥२२६॥

जीवित सफल कोनुं ?

सप्तभीस्थानमुक्तानां यत्रास्तमितशायिनाम् । त्रिकालयोगयुक्तानां जीवितं सफलं भवेत् ॥२२७॥
आर्त–रौद्रपरित्यागाद् धर्म–शुक्लसमाश्रयात् । जीवः प्राप्नोति निर्वाणमनन्तसुखमच्युतम् ॥२२८॥
आत्मानं विनियम्याशु विषयेषु पराङ्मुखः । साधयेत् स्वहितं प्राज्ञो ज्ञानाभ्यासरतो यतिः ॥२२९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सर्वसंगनो त्याग करवाथी छेवटे मोक्षपद मळे छे

यथा सङ्गपरित्यागस्तथा कर्मविमोचनम् । यथा च कर्मणां छेदस्तथाऽऽसन्नं परं पदम् ॥२३०॥

विद्वाने शरीरनी पण मूर्च्छानो त्याग करवो जोइए

यत् परित्यज्य गन्तव्यं तत् स्वकीयं कथं भवेत्? । इत्यालोच्य शरीरेऽपि विद्वानाशां परित्यजेत् ॥२३१॥

नूनं नात्मा प्रियस्तेषां ये रताः सङ्गसंग्रहे । प्रियश्चेदपकृत्तुच्छं स्वीकर्तुं नैव शक्यते ॥२३२॥

शरीरमात्रसङ्गेन भवेदारम्भवर्तनम् । तदशाश्वतमत्राणं तस्मिन् विद्वान् रतिं त्यजेत् ॥२३३॥

संगति अने ममत्वथी ज संसारनी वृद्धि अने दुःखनी परंपरा थाय छे

सङ्गात् संजायते गृद्धिर्गृद्धो वाञ्छति सञ्चयम् । सञ्चयाद् वर्धते लोभो लोभात्संसृतिवर्धनम् ॥२३४॥

ममत्वाज्जायते लोभो लोभाद् रागश्च जायते । रागाच्च जायते द्वेषो द्वेषाद्दुःखपरम्परा ॥२३५॥

निर्ममता ज सर्वसुखनुं कारण छे

निर्ममत्वं परं तत्त्वं निर्ममत्वं परं सुखम् । निर्ममत्वं परं बीजं मोक्षस्य कथितं बुधैः ॥२३६॥

निर्ममत्वे सदा सौख्यं संसारस्थितिच्छेदनम् । जायते परमोत्कृष्टं आत्मनि संस्थिते सति ॥२३७॥

द्रव्यना दोषो

अर्थो मूलमनर्थानामर्थो निर्वृतिनाशनः । कषायोत्पादकश्चार्थो दुःखानां च विधायकः ॥२३८॥



P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

आप्तोज्झितानि वित्तानि त्वया सर्वाणि संसृतौ । पुनस्तेषु रतिः कष्टा शुक्तवान्त इवौदने ॥२३९॥
को वा वित्तं समादाय परलोकं गतः पुमान् ? । येन तृष्णाग्निसंतप्तः कर्म बध्नाति दारुणम् ॥२४०॥

जगतमां जे संतोषी ते ज सुखी होय छे

तृष्णान्धा नैव पश्यन्ति हितं वा यदि वाऽहितम् । सन्तोषाञ्जनमासाद्य पश्यन्ति सुधियो जनाः ॥२४१॥
सन्तोषसारसद्रत्नं समादाय विचक्षणाः । भवन्ति सुखिनो नित्यं मोक्षसन्मार्गवर्तिनः ॥२४२॥
तृष्णानलप्रदीप्तानां सुसौख्यं तु कुतो नृणाम् ? । दुःखमेव सदा तेषां ये रता धनसञ्चये ॥२४३॥
सन्तुष्टाः सुखिनो नित्यमसन्तुष्टाः सुदुःखिताः । उभयोरन्तरं ज्ञात्वा सन्तोषे क्रियतां रतिः ॥२४४॥
द्रव्याशां दूरतस्त्यक्त्वा सन्तोषं कुरु सन्मते ! । मा पुनर्दीर्घसंसारे पर्यटिष्यसि निश्चितम् ॥२४५॥

संतोषी ज परम सुखी होय छे

ईश्वरो नाम सन्तोषी यो न प्रार्थयतेऽपरम् । प्रार्थना महतामत्र परं दारिद्र्यकारणम् ॥२४६॥
हृदयं दह्यतेऽत्यर्थं तृष्णाग्निपरितापितम् । न शक्यं शमनं कर्तुं विना सन्तोषवारिणा ॥२४७॥
यैः सन्तोषोदकं पीतं निर्ममत्वेन वासितम् । त्यक्तं तैर्मानसं दुःखं दुर्जनेनैव सौहृदम् ॥२४८॥
यैः सन्तोषामृतं पीतं तृष्णातृड्पनाशनम् । तैः सुनिर्वाणसौख्यस्य कारणं समुपार्जितम् ॥२४९॥
सन्तोषं लोभनाशाय धृतिं चाऽसुखशान्तये । ज्ञानं च तपसो वृद्ध्यै धारयन्ति मुनीश्वराः ॥२५०॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

ज्ञान—दर्शनयुक्त आत्मा ज शाश्वत छे

ज्ञान—दर्शनसम्पन्न आत्मा चैको ध्रुवो मम । शेषा भावाश्च मे बाह्याः सर्वे संयोगलक्षणाः ॥२५१॥
संयोगमूला जीवेन प्राप्ता दुःखपरम्परा । तस्मात् संयोगसम्बन्धं त्रिविधेन परित्यजेत् ॥२५२॥

जिनेश्वरभाषित भावो उपर श्रद्धा राखवी

ये हि जीवादयो भावाः सर्वज्ञैर्भाषिताः पुरा । अन्यथा च क्रिया तेषामिति चिन्ता निरर्थका ॥२५३॥
यथा च कुरुते जन्तुर्ममत्वं विपरीतधीः । तथा हि बन्धमायाति तस्य कर्म समन्ततः ॥२५४॥

अज्ञान अने परिग्रहथी आत्मा कर्म बांधे छे अने दुःखी थाय छे

अज्ञानावृतचित्तानां राग-द्वेषवशात्मनाम् । आरम्भेषु प्रवृत्तानां हितं तेषां न भीतवत् ॥२५५॥
परिग्रहपरिष्वङ्गाद् रागो द्वेषश्च जायते । राग-द्वेषौ महाबन्धकारणं बत कर्मणाम् ॥२५६॥

खरो यज्ञ कयो ?

सर्वसङ्गान् पशून् कृत्वा ध्यानाग्नावाहुतिं क्षिपेत् । कर्माणि समिधश्चैव यागोऽयं सुमहाफलः ॥२५७॥
राजसूयसहस्राणि अश्वमेधशतानि च । अनन्तभागतुल्यानि न स्युस्तस्य कदाचन ॥२५८॥

शुभबुद्धि दया अने मैत्री आ लोक अने परलोकमां हितकर छे

सा प्रज्ञा या शमे याति विनियोगपरा हिता । शेषा हि निर्दया प्रज्ञा कर्मोपार्जनकारिणी ॥२५९॥



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

प्रज्ञाङ्गना सदा सेव्या पुरुषेण सुखावहा । हेयोपादेयतत्त्वज्ञा या रता सर्वकर्मणि ॥२६०॥
दयाङ्गना सदा सेव्या सर्वकामफलप्रदा । सेविताऽसौ करोत्याशु मानसं करुणामयम् ॥२६१॥
मैत्र्यङ्गना सदोपास्या हृदयानन्दकारिणी । या विधत्ते कृतोपास्तिश्चित्तं विद्वेषवर्जितम् ॥२६२॥
सर्वसत्त्वे दयामैत्रीं यः करोति सुमानसः । जयत्यसावरीन् सर्वान् बाह्याभ्यन्तरसंस्थितान् ॥२६३॥

कर्मनी निर्जरा कोण करे छे ?

शमं नयति भूतानि यः शक्तो देशनाविधौ । द्रव्यादिलब्धियुक्तो यः प्रत्यहं तस्य निर्जरा ॥२६४॥

क्षमाथी कर्म खपे छे, अने चित्त निर्मळ थाय छे

शमो हि न भवेद् येषां ते नराः पशुसन्निभाः । समृद्धा अपि सच्छास्त्रे कामार्थरतिसङ्गिनः ॥२६५॥
कर्मणां ध्वंसने चित्तं रागं मोहारिनाशने । द्वेषं कषायवर्गे च नाऽयोग्यो लब्धुमर्हति ॥२६६॥
चित्ते नरक-तिर्यक्षु भ्रमतोऽपि निरन्तरम् । जन्तो ! ते विद्यते नैव शमो दुरितबन्धनः ॥२६७॥
मनस्याह्लादिनी सेव्या सर्वकालं सुखप्रदा । उपनेया त्वया भद्र ! क्षमा नाम कुलाङ्गना ॥२६८॥
क्षमया क्षीयते कर्म दुःखदं पूर्वसंश्रितम् । चित्तं च जायते शुद्धं विद्वेष-भयवर्जितम् ॥२६९॥
प्रज्ञा दया च मैत्री च समता करुणा क्षमा । सम्यक्त्वसहिताः सेव्याः सिद्धिसौधसुखप्रदाः ॥२७०॥
भयं याहि भवाद् भीमात् प्रीतिं च जिनशासने । शोकं पूर्वकृते पापे यदीच्छेर्हितमात्मनः ॥२७१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कुसंगनो त्याग करी सत्संग करवो जोइए

कुसंसर्गः सदा त्याज्यो दोषाणां प्रविधायकः । सगुणोऽपि जनस्तेन लघुतां याति तत्क्षणात् ॥२७२॥

सत्संयोगो बुधैः कार्यः सर्वकालसुखप्रदः । तेनैव गुरुतां याति गुणहीनोऽपि मानवः ॥२७३॥

साधूनां खलसङ्गेन चेष्टितं मलिनं भवेत् । सैंहिकेयसमासक्त्या भास्वद्भानोरपि क्षयः ॥२७४॥

संसर्गो न हि कर्तव्यः कदाचिदसतां सताम् । शुण्डिनीहस्तपयसा वारुणी च विधीयते ॥२७५॥

रागादयो महादोषाः खलास्ते गदिता बुधैः । तेषां समाश्रयस्त्याज्यस्तत्त्वविद्भिः सदा नरैः ॥२७६॥

जगतमां गुणो ज पूजाय छे

गुणाः सुपूजिता लोके गुणाः कल्याणकारकाः । गुणहीना हि लोकेऽस्मिन् महान्तोऽपि मलीमसाः ॥२७७॥

सद्गुणैर्गुरुतां याति कुलहीनोऽपि मानवः । निर्गुणः सुकुलाढ्योऽपि लघुतां याति तत्क्षणात् ॥२७८॥

शुद्ध चारित्र पाळनार महात्मानी इंद्रादि पण सेवा करे छे

सद्वृत्तः पूज्यते देवैराखण्डलपुरस्सरैः । असद्वृत्तस्तु लोकेऽस्मिन् निन्द्यतेऽसौ सुतैरपि ॥२७९॥

चारित्रं तु समादाय ये पुनर्भङ्गमागताः । ते साम्राज्यं परित्यज्य दास्यभावं प्रपेदिरे ॥२८०॥

शीळनुं माहात्म्य

शीलसंधारिणां पुंसां मनुष्येषु सुरेषु च । आत्मा गौरवमायाति परत्रेह च सन्ततम् ॥२८१॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आपदो हि महाघोरास्तत्त्वसन्धानसङ्गतैः । निस्तीर्यन्ते महोत्साहैः शीलरक्षणतत्परैः ॥२८२॥
वरं तत्क्षणतो मृत्युः शीलसंयमधारिणाम् । न तु सच्छीलहीनानां कल्पान्तमपि जीवितम् ॥२८३॥
वरं परगृहे भिक्षा याचिता शीलधारिणा । न तु सच्छीलभङ्गेन साम्राज्यमपि जीवितम् ॥२८४॥
धनहीनोऽपि शीलाढ्यः पूज्यः सर्वत्र विष्टपे । शीलहीनो धनाढ्योऽपि न पूज्यः स्वजनेष्वपि ॥२८५॥
वरं सदैव दारिद्र्यं शीलैश्वर्यसमन्वितम् । न तु शीलविहीनानां विभवश्चक्रवर्तिनः ॥२८६॥
धनहीनोऽपि सद्वृत्तो याति निर्वाणनाथताम् । चक्रवर्त्यप्यसद्वृत्तो याति दुःखपरम्पराम् ॥२८७॥
सुखा रात्रिर्भवेत्तेषां येषां शीलं सुनिर्मलम् । न तु सच्छीलहीनानां दिवसोऽपि सुखावहः ॥२८८॥

क्रोधथी कर्मनी अने दुःखनी वृद्धि तथा सुखनो विनाश थाय छे.

देहं दहति कोपाग्निस्तत्क्षणं समुदीरितः । वर्धमानः शमं सर्वं चिरकालसमर्जितम् ॥२८९॥
क्रोधेन वर्धते कर्म दारुणं भववर्धनम् । शिक्षा च क्षीयते सद्यस्तपश्च समुपार्जितम् ॥२९०॥
सुदुष्टमनसा पूर्वं यत्कर्म समुपार्जितम् । तद्विपाके भवेदुग्रं कोऽन्येषां क्रोधमुद्वहेत् ? ॥२९१॥
शोध्यमाने तु कर्मर्णे सत्सुखं किं न जायते । स्वहितं यः परित्यज्य तापनात्पापमाहरेत् ? ॥२९२॥
छिद्यमाने ऋणे यद्वच्चेतसो जायते धृतिः । शोध्यमाने तु कर्मर्णे किं विमुक्तिर्न जायते ? ॥२९३॥
शत्रुभावस्थितान् यस्तु करोति वशवर्तिनः । प्रज्ञाप्रयोगसामर्थ्यात् स शूरः स च पण्डितः ॥२९४॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

नीच मनुष्योनी साथे विवाद न करवो

विवादो हि मनुष्याणां धर्मकामार्थनाशकृत् । वैराग्यान्धजनेनापि नित्यं चाहितकर्मणा ॥२९५॥
धन्यास्ते मानवा नित्यं ये सदा क्षमया युताः । वञ्च्यमानाः शठैर्लुब्धैर्विवादं नैव कुर्वते ॥२९६॥
वादेन बहवो नष्टा येऽपि द्रव्यमदोत्कटाः । वरमर्थपरित्यागो न विवादः खलैः सह ॥२९७॥

सुखनी इच्छावाळा पुरुषे निरभिमानी थवुं

अहङ्कारो हि लोकानां नाशाय न तु वृद्धये । यथा विनाशकाले स्यात् प्रदीपस्य शिखोज्ज्वला ॥२९८॥
हीनयोनिषु बम्भ्रम्य चिरकालमनेकधा । उच्चगोत्रं सकृत्प्राप्तः कस्ततो मानमुद्वहेत् ? ॥२९९॥
राग-द्वेषौ महाशत्रू मोक्षमार्गमलिम्लुचौ । ज्ञान-ध्यान-तपोरत्नं हरतः सुचिरार्जितम् ॥३००॥

बोधिने प्राप्त करी प्रमाद न करवो

चिरं गतस्य संसारे बहुयोनिसमाकुले । प्राप्ता सुदुर्लभा बोधिः शासने जिनभाषिते ॥३०१॥
अधुना तां समासाद्य संसारच्छेदकारिणीम् । प्रमादो नोचितः कर्तुं निमेषमपि धीमता ॥३०२॥
प्रमादं ये तु कुर्वन्ति मूढा विषयलालसाः । नरकेषु च तिर्यक्षु ते भवन्ति चिरं नराः ॥३०३॥

जेणे आत्माने वश कर्यो तेणे जगत वश कर्युं

आत्मा यस्य वशे नास्ति कुतस्तस्य परो जनः । आत्माधीनस्य शान्तस्य त्रैलोक्यं वशवर्ति च ॥३०४॥



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

आत्मिक सुख ते ज तात्त्विक सुख छे

आत्माधीनं तु यत्सौख्यं तत्सौख्यं वर्णितं बुधैः । पराधीनं तु यत्सौख्यं दुःखमेव न तत्सुखम् ॥२०५॥

पराधीनं सुखं कष्टं राज्ञामपि महौजसाम् । तस्मादेतत्समालोच्य आत्मायत्तं सुखं कुरु ॥२०६॥

आत्मायत्तं सुखं लोके परायत्तं न तत्सुखम् । एतत् सम्यग्विजानन्तो मुह्यन्ति मानुषाः कथम् ? ॥२०७॥

निःसङ्गपणुं सुखनुं साधन छे

निस्सङ्गाज्जायते सौख्यं मोक्षसाधनमुत्तमम् । सङ्गाच्च जायते दुःखं संसारस्य निबन्धनम् ॥२०८॥

पूर्वकर्मविपाकेन बाधायां यच्च शोधनम् । तदिदं तु श्वदष्टस्य रजखेडया हि ताडनम् ॥२०९॥

अज्ञानीने मानसिक दुःख पीडे छे, ज्ञानीने नहीं

अज्ञं हि बाधते दुःखं मानसं न विचक्षणम् । पवनैर्डीयते तूलं मेरोः शृङ्गं न जातुचित् ॥२१०॥

ज्ञाननुं फळ चारित्र अने वैराग्य छे, धन नहीं

परं ज्ञानफलं वृत्तं विभूतिर्न गरीयसी । तया हि वर्धते कर्म सद्वृत्तेन विमुच्यते ॥२११॥

संवेगः परमं कार्यं श्रुतस्य गदितं बुधैः । तस्माद् ये धनमिच्छन्ति ते त्यजन्त्यमृताद् विषम् ॥२१२॥

श्रुतं वृत्तं यमो येषां धनं परमदुर्लभम् । ते नरा धनिनः प्रोक्ताः शेषा निर्धननाः सदा ॥२१३॥

को हि तृप्तिं समायातो भोगैर्दुरितबन्धनैः । देवो वा देवराजो वा चक्राङ्को वा नराधिपः ॥२१४॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दुष्ट आंतरिक चित्त तीर्थस्नानथी शुद्ध थतुं नथी

दुष्टमन्तर्गतं चित्तं तीर्थस्नानान्न शुध्यति । शतशोऽपि जलैर्धौतं मद्यभाण्डमिवाऽशुचि ॥३१५॥

खरुं तीर्थ कयुं ?

आत्मा वै सुमहत्तीर्थं यदाऽसौ प्रशमे स्थितः । यदाऽसौ प्रशमे नास्ति ततस्तीर्थं निरर्थकम् ॥३१६॥

शीलव्रते जले स्नात्वा शुद्धिरस्य शरीरिणः । न तु स्नातस्य तीर्थेषु सर्वेष्वपि महीतले ॥३१७॥

खरुं स्नान कयुं ?

रागादिवर्जनं स्नानं ये कुर्वन्ति दयापराः । तेषां सुनिर्मलो योगो न तु स्नातस्य वारिणा ॥३१८॥

आत्मानं स्नापयेन्नित्यं ज्ञाननीरेण चारुणा । येन निर्मलतां याति जीवो जन्मान्तरेष्वपि ॥३१९॥

सर्वाशुचिमये काये शुक्र–शोणितसम्भवे । शुचित्वं येऽभिवाञ्छन्ति नष्टास्ते जडचेतसः ॥३२०॥

औदारिके शरीरेऽस्मिन् सप्तधातुमयेऽशुचौ । शुचित्वं येऽभिमन्यन्ते पशवस्ते न मानवाः ॥३२१॥

मन वचन अने कायानी शुद्धि शाथी थाय ?

सत्येन शुध्यते वाणी मनो ज्ञानेन शुध्यति । गुरुशुश्रूषया कायः शुद्धिरेषा सनातनी ॥३२२॥

स्वर्ग–मोक्षोचितं नृत्वं मूढैर्विषयलालसैः । कृतं स्वल्पसुखस्यार्थे तिर्यङ्–नरकभाजनम् ॥३२३॥

सामग्रीं प्राप्य सम्पूर्णां यो विजेतुं निरुद्यमः । विषयारिमहासैन्यं तस्य जन्म निरर्थकम् ॥३२४॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वाक्य केवुं बोलवुं ?

निरवद्य वदेद् वाक्यं मधुरं हितमर्थवत् । प्राणिनां चेतआह्लादि मिथ्यावादबहिष्कृतम् ॥३२५॥

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः । तस्मात्तदेव कर्तव्यं किं वाक्येऽपि दरिद्रता ? ॥३२६॥

व्रतं शीलं तपो दानं संयमोऽर्हत्प्रपूजनम् । दुःखविच्छित्तये सर्वं प्रोक्तमेतन्न संशयः ॥३२७॥

मोक्ष मेळववाने योग्य कोण ?

तृणतुल्यं परद्रव्यं परं च स्वशरीरवत् । पररामां समां मातुः पश्यन् याति परं पदम् ॥३२८॥

कर्मनी निर्जराना उपाय

सम्यक्त्वात् समतायोगान्निःसङ्गात् सहनात्तथा । कषायविषयाऽसङ्गात् कर्मणां निर्जरा परा ॥३२९॥

ध्यान कोनुं धरवुं ?

आर्हन्त्यं महिमोपेतं सर्वज्ञं परमेश्वरम् । ध्यायेद् देवेन्द्रचन्द्रार्कसभान्तःस्थं स्वयम्भुवम् ॥३३०॥

पार्श्वजिनेन्द्रने नमस्कार

सर्वातिशयसम्पूर्णं दिव्यलक्षणलक्षितम् । सर्वभूतहितं देवं शीलशैलेन्द्रशेखरम् ॥३३१॥

घातिकर्मविनिर्मुक्तं मोक्षलक्ष्मीकटाक्षितम् । अनन्तमहिमायुक्तं त्रयोदशगुणस्थितम् ॥३३२॥

अनन्तचरितं चारुचारित्रसमुपासितम् । विचित्रनयनिर्णीतं विश्वं विश्वैकवत्सलम् ॥३३३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ज्योति-
विजय-
॥ १६ ॥

निरुद्धकरणग्रामं निषिद्धविषयद्विषम् । ध्वस्तरागादिसन्तानं भवज्वलनवार्मुचम् ॥३३४॥
दिव्यरूपधरं धीरं विशुद्धज्ञानलोचनम् । अपि त्रिदश–योगीन्द्रकल्पनातीतवैभवम् ॥३३५॥
स्याद्वादपविनिर्घातभिन्नान्यमतभूधरम् । ज्ञानामृतपयःपूरैः पवित्रितजगत्त्रयम् ॥३३६॥
इत्यादिगणनातीतगुणरत्नमहार्णवम् । देवदेवं जिनं पार्श्वं वन्दे सर्वार्थसिद्धिदम् ॥३३७॥

ग्रन्थकारप्रशस्तिः

एकषष्टितमे पट्टे विजयसिंहसूरिराट् । तपगच्छाधिपो जज्ञे सज्ज्ञानामृतशेवधिः ॥३३८॥
तस्य ज्ञान–क्रियानिष्ठः सच्चारित्रपवित्रितः । संविग्नव्योममार्तण्डः श्रीसत्यविजयोऽन्तिषत् ॥३३९॥
कर्पूरोज्ज्वलसत्कीर्तिः कर्पूरविजयाभिधः । तेषां शिष्योऽभवद् भूरिकीर्तिकर्बुरिताम्बरः ॥३४०॥
श्रीक्षमाविजयो नाम वाचंयमशिरोमणिः । तेषां पट्टे पवित्रात्मा बभूव भुवि विश्रुतः ॥३४१॥
सज्जनानां शिरोत्तंसः श्रीजिनाद्विजयाभिधः । तदन्तिषत् पण्डितानां मण्डनो भुवि विश्रुतः ॥३४२॥
तदन्तिषत् पवित्राङ्गः श्रीमदुत्तमनामभृत् । जैनसिद्धान्तपाथोधिमन्थनैकसुराचलः ॥३४३॥
तत्पट्टपूर्वदिग्नाथः श्रीपद्मविजयाभिधः । वर्तते भव्यसत्त्वानां बोधयन् भुवि विश्रुतः ॥३४४॥
ज्योतिर्विजयशिष्येण गुरूणामुपदेशतः । आद्याभ्यासे कृतो ग्रन्थः श्रीतत्त्वामृतनामकः ॥३४५॥
बाणवेदाष्टचन्द्रे(१८४५) च वत्सरे विक्रमार्कतः । माघे श्वेताष्टमीघस्रे कृतोऽणहिल्लपत्तने ॥३४६॥

श्रीतत्त्वामृतं समाप्तम्

विरचितं
तत्त्वामृतम् ।
॥ १६ ॥

શ્રી મોહનલાલજી
જૈન જ્ઞાન ભંડાર
ગોપીપુરા, સુરત.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust